**Series LRH/1**

Code No. / कोड नं. **52/1**

Roll No.
रोल नं.

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| | | | | | | | |

Candidates must write the Code on the title page of the answer-book.
परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें।

- Please check that this question paper contains **16** printed pages.
- Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **18** questions.
- **Please write down the serial number of the question before attempting it.**
- 15 minutes time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m. the student will read the question paper only and will not write any answer on the answer script during this period.
- कृपया जांच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **16** हैं।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें।
- कृपया जांच कर लें कि इस प्रश्न-पत्र में **18** प्रश्न हैं।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।**
- इस प्रश्नपत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है। प्रश्नपत्र का वितरण पूर्वाह्न में 10.15 बजे किया जायेगा। 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्नपत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे।

# संस्कृतम् (सम्प्रेषणाधारितम्)

# COMMUNICATIVE SANSKRIT

*अवधिः : होरात्रयम् ]* *[ पूर्णाङ्काः : 100*

*निर्धारित समय : 3 घण्टे ]* *[ अधिकतम अङ्काः : 100*

*Time allowed : 3 hours ]* *[ Maximum marks : 100*

| | | |
|---|---|---|
| खण्डः क : अपठितांश-अवबोधनम् /अपठित-अवबोधन | | 15 अङ्काः |
| Section A : Unseen Reading Comprehension | | |
| खण्डः ख : रचनात्मककार्यम् /रचनात्मक-कार्य | | 20 अङ्काः |
| Section B : Writing Skills | | |
| खण्डः ग : अनुप्रयुक्तव्याकरणम् /अनुप्रयुक्त व्याकरण | | 30 अङ्काः |
| Section C : Applied Grammar | | |

खण्डः घ : पठित-अवबोधनम् /पठित-अवबोधन 35 अङ्काः

Section D : Reading Comprehension

***Instructions :***

*निर्देशः*

*(i)* *अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।*
*इस प्रश्न-पत्र में चार खण्ड हैं।*
*The question paper has four sections.*

*(ii)* *प्रतिखण्डम् उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।*
*प्रत्येक खण्ड के उत्तर पृथक् दी गई उत्तर-पुस्तिका में ही लिखने हैं।*
*The answers have to be written in a separate answer-sheet.*

*(iii)* *प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*
*प्रत्येक खण्ड के उत्तर एक ही जगह पर क्रम से लिखने होंगे।*
*The answers to each section must be written in a serial at one place.*

*(iv)* *प्रश्नपत्रे उत्तराणि न लेखनीयानि।*
*प्रश्न-पत्र पर उत्तर न लिखें।*
*Don't write answers in the question paper.*

*(v)* *प्रश्न-संख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*
*प्रश्न-पत्र के अनुसार प्रश्न-संख्या अवश्य ही लिखनी होगी।*
*Write the question number according to the question paper.*

*(vi)* *सर्वेषां प्रश्नानाम् उत्तराणि **संस्कृतेन** लेखनीयानि।*
*सभी प्रश्नों के उत्तर **संस्कृत** में लिखिए।*
*Answer all the questions in **Sanskrit**.*

## खण्डः 'क'

## (Section A)

## अपठितांश-अवबोधनम् (अपठित-अवबोधन)

**Unseen Reading Comprehension** **15 अङ्काः**

**1.** अधोलिखितम् अनुच्छेद**द्वयं** पठित्वा प्रदत्तप्रश्नान् उत्तरत-

निम्नलिखित **दोनों** अनुच्छेदों को पढ़कर दिए गए प्रश्नों के उत्तर लिखिए -

Read the following **two** passages and answer the given questions :

**(अ) प्रथमः अनुच्छेदः**

अस्माकं भारतस्य संस्कृतिः प्रतीक-प्रधाना संस्कृतिः अस्ति। अस्माकम् अनेकानि प्रतीकचिह्नानि सन्ति। यथा दीपकः प्रकाशस्य प्रतीकम् अस्ति। चक्रं समयस्य प्रतीकं

मन्यते। स्वस्तिचिह्नं कल्याणस्य प्रतीकम्। अस्माकं संविधानद्वारा अपि अनेकानि चिह्नानि स्वीकृतानि। अस्माकं राष्ट्रपक्षी मयूरः अस्ति, राष्ट्रीयः पशुः सिंहः राष्ट्रीयं पुष्पं च कमलम्।

अस्माकं भारतमाता मातुः प्रतीकम् अस्ति। अस्माकम् अनेके राष्ट्रीयाः दिवसाः अपि सन्ति। स्मरणीयाः एते दिवसाः।

I एकपदेन उत्तरत –

एक शब्द में उत्तर दीजिए –

Answer in one word : ½×2=1

(i) दीपकः कस्य प्रतीकम् अस्ति ?

(ii) अस्माकं राष्ट्रपुष्पं किम् ?

II पूर्णवाक्येन उत्तरत –

पूर्ण वाक्य में उत्तर दीजिए –

Answer in complete sentence : 1×2=2

(i) भारतीयसंस्कृतिः कीदृशी अस्ति ?

(ii) भारतमाता कस्याः प्रतीकम् अस्ति ?

III यथानिर्देशम् उत्तरत –

निर्देशानुसार उत्तर दीजिए –

Answer as directed : ½×4=2

(i) 'स्मरणीयाः दिवसाः' इति पदयोः विशेषणपदं किम् ?

(ii) 'बहूनि' इति अर्थे अनुच्छेदे किं पदं प्रयुक्तम् ?

(iii) 'चक्रं समयस्य प्रतीकं मन्यते।' इति वाक्ये क्रियापदं किम् ?

(iv) 'अन्धकारस्य' इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

**(आ) द्वितीयः अनुच्छेदः**

एकं सुन्दरं विशालं च उपवनम् आसीत्। तस्मिन् सुन्दरे उपवने फलानाम् अनेके वृक्षाः आसन्। एकदा एकः जम्बूकः अत्र-तत्र भ्रमित्वा उपवनम् आगच्छत्। सः अतीव बुभुक्षितः आसीत्। उपवने सः द्राक्षालतां पश्यति। तस्यां लतायाम् अनेकानि द्राक्षाफलानि आसन्। कानिचित् पक्वानि द्राक्षाफलानि आसन् कानिचित् च अपक्वानि। तानि दृष्ट्वा सः जम्बूकः अचिन्तयत्-'अद्य तु अहम् एतानि द्राक्षाफलानि खादिष्यामि।' द्राक्षाफलानि प्राप्तुं सः उपरि-उपरि कूर्दते परन्तु द्राक्षाफलानि प्राप्तुं सः सफलः न अभवत्। सः पुनः-पुनः उत्पतति परन्तु पुनः-पुनः असफलः अभवत्। सः कुपितः भवति। सः द्राक्षाफलानि दृष्ट्वा कथयति- 'एतानि द्राक्षाफलानि अम्लानि सन्ति।' अनन्तरं सः ततः स्वस्थानं गच्छति।

**प्रश्नाः**

I एकपदेन उत्तरत –

एक शब्द में उत्तर दीजिए –

Answer in one word : 1×2=2

(i) जम्बूकः उपवने किं पश्यति ?

(ii) किं जम्बूकः द्राक्षाफलानि प्राप्तुं सफलः अभवत् ?

II पूर्णवाक्येन उत्तरत –

पूर्ण वाक्य में उत्तर दीजिए –

Answer in complete sentence : 2×2=4

(i) फलानाम् अनेके वृक्षाः कुत्र आसन् ?

(ii) द्राक्षाफलानि प्राप्तुं जम्बूकः किं करोति ?

III यथानिर्देशम् उत्तरत –

निर्देशानुसार उत्तर दीजिए –

Answer as directed : ½×4=2

(i) 'विशालम् उपवनम्' इति पदयोः विशेष्यपदं किम् ?

(ii) 'नीचैः-नीचैः' इति अव्ययपदस्य किं विपरीत-अव्ययपदम् अत्र प्रयुक्तम् ?

(iii) 'सः कुपितः भवति।' इति वाक्ये कर्तृपदं किम् अस्ति ?

(iv) 'पश्चात्' इति अर्थे अस्मिन् अनुच्छेदे किं पदं प्रयुक्तम् ?

IV अस्य अनुच्छेदस्य कृते एकम् उपयुक्तं शीर्षकं लिखत।

इस अनुच्छेद के लिए एक उपयुक्त शीर्षक लिखिए।

Write a suitable title for this passage. 2×1=2

## खण्डः 'ख'

## (Section B)

## रचनात्मककार्यम् (रचनात्मक कार्य)

## Writing Skills

**20 अङ्काः**

2. पित्रा पुत्रीं प्रति लिखितम् अधोपत्रं मञ्जूषायां प्रदत्तपदैः पूरयत –

पिता के द्वारा पुत्री को लिखे गए निम्नलिखित पत्र को मंजूषा में दिए गए पदों से पूर्ण कीजिए –

The following letter is written by father to her daughter. Complete it with the help of words given in the box : ½×10=5

(i) ________

(ii) ________

(iii) ________

मन्ये यत् भवती तत्र कुशलिनी इति। अत्र गृहे सर्वे (iv) ________ सन्ति। तव जननी त्वां सर्वदा (v) ________ । तव भ्राता राष्ट्रीयस्तरस्य क्रीडासु भागं स्वीकर्तुं गतः। सः अग्रिमसप्ताहे आगमिष्यति। भवत्याः (vi) ________ कदा भविष्यति? भवती गृहं कदा आगमिष्यति? अध्ययनं तु सम्यक् चलति इति (vii) ________ । इदानीम् (viii) ________ कथम् अस्ति? सर्वेभ्यः मम शुभकामना। अन्यत् सर्वं कुशलम्। (ix) ________ लिखतु।

भवदीयः (x) ________

प्रकाशचन्द्रः

**मञ्जूषा**

| |
|---|
| स्वास्थ्यम्, श्रीनगरतः, कुशलिनः, विश्वसिमि, पिता, प्रियपुत्रि!, स्मरति, ग्रीष्मावकाशः, शुभाशिषः, पत्रम्। |

**3.** **संवादलेखनम्**

अधोलिखितं संवादं मञ्जूषायां प्रदत्तवाक्यानां सहायतया पूरयित्वा पुनः लिखत –

निम्नलिखित संवाद को मंजूषा में दी गई पंक्तियों की सहायता से पूरा करके पुनः लिखिए –

Complete the following dialogue with the help of lines given in the box : $1 \times 5 = 5$

**कुमारः** - महोदये! नमस्कारः।

**शालिनी** - नमस्कारः। सुस्वागतम्। आगच्छतु। उपविशतु। किम् इच्छति?

**कुमारः** - (1) ________

**शालिनी** - एवं न वदतु। किमपि अवश्यं स्वीकरणीयम्।

**कुमारः** - मम इच्छा न अस्ति।

**शालिनी** - (2) ____________________

**कुमारः** - यदि एवं तर्हि एकं सेवफलं यच्छतु।

**शालिनी** - अनुगृहीता अस्मि। (3) ____________________

**कुमारः** - तावत्पर्यन्तम् अद्यतनं समाचारपत्रं पठामि।

**शालिनी** - (सेवफलम् आनीय कुमाराय यच्छति) खादतु। कथम् अस्ति ?

**कुमारः** - (4) ____________________

**शालिनी** - स्वास्थ्यवर्धकं सेवफलं प्रतिदिनं खादितव्यम् इति श्रूयते।

**कुमारः** - अहं प्रतिदिनम् एकं सेवफलम् अवश्यम् खादामि।

**शालिनी** - किञ्चित् अधिकम् इच्छति ?

**कुमारः** - (5) ____________________। अधुना गच्छामि। नमस्कारः।

**शालिनी** - नमस्करोमि, गच्छतु भवान् पुनर्दर्शनाय।

**मञ्जूषा**

1. गत्वा सेवफलम् आनयामि।
2. अतीव मधुरम्।
3. नहि,पर्याप्तम्।
4. अहं किमपि न इच्छामि।
5. दूरतः समागतो भवान्, किञ्चित्तु ग्रहीतव्यमेव।

**4. चित्रवर्णनम्**

अधोदत्तचित्रस्य वर्णनं मञ्जूषायां प्रदत्तपदानां सहायतया **पञ्चसु** संस्कृतवाक्येषु कुरुत –

नीचे दिए गए चित्र का वर्णन मंजूषा में दिए गए शब्दों की सहायता से **पाँच** संस्कृत वाक्यों में कीजिए –

Describe the following picture in **five** Sanskrit sentences with the help of words given in box : 2×5=10



**मञ्जूषा**

| |
|---|
| चित्रम्, चित्रे, अस्ति, सन्ति, सुन्दरम्, हरिणः, शशकः, कच्छपः, वृक्षाः, पक्षिणः, तडागे, पुष्पाणि, मीनाः, पर्वताः, मण्डूकः, चन्द्रः, आकाशे, पर्वतीयस्थलस्य, इदम्, पादपाः, पश्यति। |

**अथवा**

**Or**

**केवल प्रज्ञाचक्षुर्भ्यः (केवल नेत्रहीनों के लिए)**

**For blind candidates only**

मञ्जूषायां प्रदत्तपदानां साहाय्येन निम्नलिखितविषयम् अधिकृत्य **पञ्च**संस्कृतवाक्येषु एकम् अनुच्छेदं लिखत –

मंजूषा में दिए शब्दों की सहायता से निम्नलिखित विषय पर **पाँच** संस्कृत वाक्यों में एक अनुच्छेद लिखिए –

Write a paragraph in **five** Sanskrit sentences on the following topic with the help of words given in box : 2×5=10

**मम राष्ट्रम् भारतवर्षम्**

| |
|---|
| प्राचीनं, महान्, देशः, विशालः, मातृभूमिः, प्रजातान्त्रिकं, राज्यानि, विविधाः भाषाः, वैविध्यमयी संस्कृतिः, उत्तरे, दक्षिणे, विशालः हिमालयः, समुद्रः, षड् ऋतवः, मिलित्वा, ऐक्यम्, सन्ति, अस्ति, भवति, वसन्ति, उत्सवाः। |

## खण्डः 'ग'
## (Section C)
## अनुप्रयुक्त-व्याकरणम् (अनुप्रयुक्त व्याकरण)
## Applied Grammar

**30 अङ्काः**

5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कृत्वा लिखत–

निम्नलिखित वाक्यों में रेखांकित पदों में संधि अथवा संधिच्छेद करके लिखिए–

Write the underlined words of the following sentences after joining or disjoining Sandhis : 1×3=3

(i) धन + आगमनं श्रुत्वा।

(ii) सन्मित्रं कस्य हितं न करोति ?

(iii) अश्वः गजः + च मिलित्वा धावतः।

6. अधोलिखितवाक्येषु रेखाङ्कितपदेषु समासं विग्रहं वा विधाय लिखत–

निम्नलिखित वाक्यों में रेखाङ्कित पदों में समास अथवा विग्रह करके लिखिए–

Compound or expound the underlined words of the following sentences and write : 1×4=4

(i) मृगाः वनस्य क्षेत्रे कूर्दन्ते।

(ii) यत्र-यत्र क्रोधः च लोभः च तत्र-तत्र कुत्र शान्तिः ?

(iii) इदं सचित्रं पुस्तकम् अस्ति।

(iv) दशाननः अभिमानी राजा आसीत्।

7. अधोलिखितवाक्येषु कोष्ठकान्तर्गतानां पदानां प्रकृति-प्रत्ययौ योजयित्वा लिखत–

निम्नलिखित वाक्यों में कोष्ठक के अन्तर्गत दिए गए पदों के प्रकृति-प्रत्ययों को जोड़कर लिखिए –

Rewrite the words of the following sentences after joining suffixes to the roots or words given in the brackets : 1×5=5

(i) पुस्तकालये पुस्तकम् उच्चैः न ________ । (पठ् + तव्यत्)

(ii) शीघ्रं ________ अश्वः अधुना शनैः-शनैः धावति। (धाव् + शतृ)

(iii) ________ मनुष्यः किं कर्तुं न समर्थः ? (शक्ति + मतुप्)

(iv) ________ एव सर्वत्र पूजनीया। (मानव + तल्)

(v) सा स्वभावेन अतीव ________ अस्ति। (सरल + टाप्)

8. अधोलिखितवाक्येषु रिक्तस्थानानि उचित अव्ययपदैः मञ्जूषा-पद-सहायतया पूरयित्वा लिखत –

निम्नलिखित वाक्यों में रिक्त स्थानों की पूर्ति मंजूषा में दिए गए उचित अव्ययों के द्वारा कीजिए –

Fill in the blanks in the following sentences with appropriate indeclinable words given in the box : 1×5=5

(i) ताः पठितुं ________ गमिष्यन्ति।

(ii) ________ त्वं गायसि तथा अहं गातुं न समर्थः।

(iii) उच्चैः ________ हस।

(iv) सः ________ अपि आगच्छत्।

(v) यूयम् अत्र क्रीडितुं ________ आगच्छथ ?

**मञ्जूषा**

| ह्यः, मा, श्वः, कदा, यथा |
| --- |

9. अधोलिखितसंवादे रिक्तस्थानानि वाच्यानुसारं पूरयत –

निम्नलिखित संवाद में रिक्त स्थानों की पूर्ति वाच्यानुसार कीजिए –

Fill in the blanks in the following dialogue as per voice : 1×3=3

**सुमेधा** - सुधीर ! अधुना त्वं किं करोषि ?

**सुधीरः** - सुमेधे ! अधुना तु मया किमपि न क्रियते। त्वं किं करोषि ?

**सुमेधा** - मया अपि किमपि न (i) ______________ परन्तु एकं पुस्तकं पठितुम् इच्छामि।

**सुधीरः** - शोभनम्। त्वं (ii) ______________ पठितुम् इच्छसि। पठतु। गच्छामि।

**सुमेधा** - पठामि परन्तु त्वं कुत्र गच्छसि ?

**सुधीरः** - (iii) ______________ भ्रमणाय उद्यानं गच्छामि।

**सुमेधा** - शोभनम्। गच्छतु।

10. अधोलिखिते कार्यक्रमे अङ्कानां स्थाने समयं संस्कृतपदेषु लिखत –

निम्नलिखित कार्यक्रम में अंकों के स्थान पर समय को संस्कृत शब्दों में लिखिए –

Indicate the time in Sanskrit words in place of figures in the following programme : 1×4=4

**विद्यालये सङ्गीतसभायाः कार्यक्रमः**

(i) प्रातः 10.30 वादने उद्घाटनम्।

(ii) प्रातः 10.45 वादने कार्यक्रमस्य परिचयः।

(iii) प्रातः 11.15 वादने सङ्गीतवादनम्।

(iv) सायङ्काले 4.00 वादने समापनम्।

11. अधोलिखितवाक्येषु अङ्कानां स्थाने संस्कृत-सङ्ख्यावाचक-विशेषणानि प्रयुज्य उत्तराणि लिखत –

निम्नलिखित वाक्यों में अंकों के स्थान पर संस्कृत संख्यावाचक विशेषण शब्दों का प्रयोग करके उत्तर लिखिए –

Replace numerals with Sanskrit numerical adjectives in the following sentences : ½×4=2

(i) वने 2 सिंहौ अत्र-तत्र भ्रमतः।

(ii) मम वाटिकायाम् 1 विशालद्राक्षालता अस्ति।

(iii) मम विद्यालये 60 शिक्षकाः शिक्षिकाः च सन्ति।

(iv) अस्मिन् भवने 5 जनाः वसन्ति।

**12.** अधोलिखितवाक्यानि संशोध्य लिखत –

निम्नलिखित वाक्यों को शुद्ध करके लिखिए –

Write the following sentences after correction : 1×4=4

(i) तत्र द्वे बालिके पठन्ति।

(ii) ते बालिकाः अत्र आगच्छन्ति।

(iii) अहम् अपि लिखसि।

(iv) सः हयः गमिष्यति।

## खण्डः 'घ'

## (Section D)

## पठित-अवबोधनम्

## Reading Comprehension

**35 अङ्काः**

**13.** अधोलिखितं गद्यांशं, पद्यांशं नाट्यांशं च पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत –

निम्नलिखित गद्यांश, पद्यांश और नाट्यांश को पढ़कर प्रदत्त प्रश्नों के उत्तर लिखिए –

Read the following prose, poetry and drama passages and answer the given questions :

**(अ) गद्यांशः**

अथ पूर्वमित्रं दुष्टबुद्धिः प्रच्छन्नभाग्यस्य धनागमवृत्तान्तं श्रुत्वा कदाचित् मध्यरात्रे तस्य एव गृहे चौर्यार्थं सन्धि-खननसुयोगम् विलोकयन् स्थितः। तस्मिन्नेव काले सुप्तोत्थितः प्रच्छन्नभाग्यः सम्भ्रान्तचित्तः स्वपत्नीं सम्बोध्य उवाच – अहो विचित्रः स्वप्नो मया दृष्टः। अस्माकं क्षेत्रे अश्वत्थतरुमूले सुवर्णपूरितः कलशः विद्यते इति। तच्छ्रुत्वा परद्रव्ये अनासक्ता सा न्यवेदयत् - नाथ! विरम अस्माद् लोभात्।

**प्रश्नाः**

I एकपदेन उत्तरत –

एक शब्द में उत्तर दीजिए –

Answer in one word : ½×2=1

(i) दुष्टबुद्धिः कस्य धनागमवृत्तान्तं श्रुत्वा तस्य गृहं गच्छति ?

(ii) अश्वत्थतरुमूले कीदृशः कलशः आसीत् ?

II पूर्णवाक्येन उत्तरत –

पूर्ण वाक्य में उत्तर दीजिए –

Answer in complete sentence : 2×1=2

(i) परद्रव्ये अनासक्ता प्रच्छन्नभाग्यस्य पत्नी किं न्यवेदयत् ?

III यथानिर्देशम् उत्तरत –

निर्देशानुसार उत्तर दीजिए –

Answer as directed : ½×4=2

(i) 'विचित्रः स्वप्नः' इति पदयोः विशेषणपदं किम् ?

(ii) 'सुवर्णपूरितः कलशः विद्यते' इति वाक्यांशे क्रियापदं किम् ?

(iii) 'अन्येषां धने' इति अर्थे अस्मिन् अनुच्छेदे किं पदं प्रयुक्तम् ?

(iv) 'सा न्यवेदयत्' इति वाक्ये कर्तृपदं किम् ?

**(आ) पद्यांशः**

न तथा शीतलसलिलं न चन्दनरसो न शीतला छाया।

प्रह्लादयति च पुरुषं, यथा मधुरभाषिणी वाणी॥

**प्रश्नाः**

I एकपदेन उत्तरत –

एक शब्द में उत्तर दीजिए –

Answer in one word : ½×2=1

(i) शीतलसलिलं कं तथा न प्रह्लादयति ?

(ii) कीदृशी छाया मनुष्यं प्रसन्नं न करोति ?

II पूर्णवाक्येन उत्तरत –

पूर्ण वाक्य में उत्तर दीजिए –

Answer in a complete sentence : 2×1=2

मधुरभाषिणी वाणी किं करोति ?

III यथानिर्देशम् उत्तरत –

निर्देशानुसार उत्तर दीजिए –

Answer as directed : ½×4=2

(i) 'शीतला छाया' इति पदयोः विशेषणपदं किम् ?

(ii) 'प्रसन्नं करोति' इति अर्थे श्लोके किं पदं प्रयुक्तम् ?

(iii) अस्मिन् श्लोके 'प्रह्लादयति' इति क्रियापदस्य कर्तृपदं किम् ?

(iv) 'उष्णजलम्' इति पदस्य किं विपरीतपदम् अस्मिन् श्लोके प्रयुक्तम् ?

**(इ) नाट्यांशः**

**मयूरः** - (प्रविश्य साट्टहासम्) सत्यं सत्यम्। अहमेव राष्ट्रपक्षी। को न जानाति तव ध्यानावस्थाम् ? मौनं धृत्वा वराकान् मीनान् छलेन अधिगृह्य, क्रूरतया भक्षयसि। धिक् त्वाम् ! अवमानितं खलु सर्वं पक्षिकुलं त्वया।

**काकः** - रे सर्पभक्षक ! नर्तनात् अन्यत् किम् अपरं जानासि ?

**मयूरः** - श्रूयतां श्रूयताम् ! मम नृत्यं तु प्रकृतेः आराधना। पश्य ! चारुवर्तुलचन्द्रिकाशोभितानां मम पिच्छानाम् अपूर्वं सौन्दर्यम्। मम केकारवं श्रुत्वा कोकिलः अपि लज्जते। मम शिरसि राजमुकुटमिव शिखां स्थापयता विधात्रा एव अहं पक्षिराजः कृतः।

**प्रश्नाः**

I एकपदेन उत्तरत –

एक शब्द में उत्तर दीजिए –

Answer in one word : ½×2=1

(i) 'अहमेव राष्ट्रपक्षी' इति कः कथयति ?

(ii) मयूरस्य नृत्यं कस्याः आराधना मन्यते ?

II पूर्णवाक्येन उत्तरत –

पूर्ण वाक्य में उत्तर दीजिए –

Answer in a complete sentence : 2×1=2

मयूरस्य केकारवं श्रुत्वा कः लज्जते ?

III यथानिर्देशम् उत्तरत –

निर्देशानुसार उत्तर दीजिए –

Answer as directed : ½×4=2

(i) 'अपूर्वं सौन्दर्यम्' इति पदयोः विशेषणपदं किम् ?

(ii) 'को न जानाति तव ध्यानावस्थाम् ?' इति वाक्ये क्रियापदं किम् ?

(iii) 'अहं पक्षिराजः कृतः।' इति वाक्ये 'अहं' सर्वनामपदं कस्मै प्रयुक्तम् ?

(iv) 'ईश्वरेण' इत्यर्थे अस्मिन् नाट्यांशे किं पदं प्रयुक्तम् ?

**14.** अधोलिखित-पद्य**द्वयस्य** भावार्थम् उचितपदैः पूरयित्वा पुनः लिखत –

निम्नलिखित **दोनों** पद्यों के भावार्थ को समुचित शब्दों से पूरा करके पुनः लिखिए –

Rewrite the following explanations of the **two** verses with appropriate words : 3+3=6

(क) य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च।
न कुर्यादहितं कर्म सः परेभ्यः कदापि च॥

**भावार्थः** - यः मनुष्यः स्वकल्याणम् अनेकानि च (i) ________ इच्छति तेन (ii) ________ कदापि अहितकरं (iii) ________ न करणीयम्।

(ख) कस्य वशे प्राणिगणः ? सत्यप्रियभाषिणो विनीतस्य।
क्व स्थातव्यम् ? न्याय्ये पथि दृष्टादृष्टलाभाढ्ये॥

**भावार्थः** - अस्मिन् लोके यः सत्यवादी प्रियवादी च अस्ति (i) __________ तस्य एव (ii) __________ भवन्ति। मनुष्येण लाभम् अगणयित्वा न्यायपूर्णे मार्गे एव (iii) __________ ।

15. अधोलिखितपद्यद्वयस्य अन्वययोः रिक्तस्थानानि पूरयत –

निम्नलिखित दोनों पद्यों के अन्वयों में रिक्त स्थानों की पूर्ति कीजिए–

Complete the prose-order of the following two verses : 1½+1½=3

(क) मित्ररूपाः हि रिपवः सम्भाष्यन्ते विचक्षणैः।
ये हितं वाक्यमुत्सृज्य विपरीतोपसेविनः॥

**अन्वयः** - ये (i) __________ वाक्यम् उत्सृज्य (ii) __________ (ते) विचक्षणैः मित्ररूपाः हि (iii) __________ सम्भाष्यन्ते।

(ख) परमापद्गतेनापि नैव तात त्वया रणे।
इदमस्त्रं प्रयोक्तव्यं मानुषेषु विशेषतः॥

**अन्वयः** - (i) __________ ! परम-आपद्गतेन अपि त्वया रणे इदम् अस्त्रं विशेषतः (ii) __________ न एव (iii) __________ ।

16. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत –

रेखांकित पदों के आधार पर प्रश्ननिर्माण कीजिए–

Frame questions on the basis of the underlined words : 1×4=4

(i) <u>अरुणाचलप्रदेशस्य</u> राजधानी ईटानगरम् अस्ति।

(ii) संवत्सरे <u>षड्</u> ऋतवः भवन्ति।

(iii) <u>क्रोधात्</u> भवति संमोहः।

(iv) राजा <u>तान्</u> उवाच।

**17.** अधोलिखितानि वाक्यानि घटनाक्रमानुसारं लिखत –

निम्नलिखित वाक्यों को घटना के क्रमानुसार लिखिए –

Write the following sentences in their sequential order : ½×8=4

(i) विचित्रा खलु दैवगतिः। विषधरः दुष्टबुद्धिं दष्टवान्।

(ii) द्वे मित्रे कुपथेन धनं प्राप्तुं ग्रामान्तरम् अगच्छताम्।

(iii) सः कृषिक्षेत्रे हलकार्यं कृत्वा श्रमेण प्रभूतं धनम् अर्जितवान्।

(iv) दुष्टबुद्धिः अश्वत्थमूलं खनित्वा सुवर्णकलशं प्राप्तवान्।

(v) दुष्टबुद्धिः इदं श्रुत्वा शीघ्रं तं क्षेत्रं गच्छति।

(vi) मार्गे एकया घटनया समुपजातविवेकः प्रच्छन्नभाग्यः स्वगृहं प्रतिनिवृत्तः।

(vii) इदं ज्ञात्वा दुष्टबुद्धिः चौर्यार्थं तस्य गृहम् अगच्छत्।

(viii) तत्र सः शृणोति – 'अहो विचित्रः स्वप्नः मया दृष्टः। अस्माकं क्षेत्रे अश्वत्थतरुमूले सुवर्णपूरितः कलशः विद्यते इति।'

**18.** निम्नलिखितवाक्येषु रेखाङ्कितपदानाम् उचितम् अर्थं चित्वा लिखत –

निम्नलिखित वाक्यों में रेखांकित पदों के उचित अर्थ चुनकर लिखें –

Select the appropriate meaning of underlined words in the following sentences and write the same : 1×3=3

(क) माधुर्यम् अक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।

(i) श्रवणमधुरता (ii) शर्करायुक्तम् (iii) मधुरवस्तु।

(ख) का सुखदा ? साधुजनमैत्री।

(i) अन्येभ्यः सुखदानम् (ii) सुखेन वसनम् (iii) सज्जनानां मित्रता।

(ग) अहो धृतिः ! अहो सत्त्वम् ! अहो सत्त्वहितैषिता !

(i) अस्तित्वम् (ii) मूलतत्त्वम् (iii) साहसम्।